# सुन्दरकाण्ड अष्टषष्टितमः सर्गः (६८) – सीता समाश्वासन कथनम्

अथाह मुत्तरं देव्या पुनरुक्तः स सम्भ्रमः ।
तव स्नेहान् नरव्याघ्र सौहार्दा दनुमान्य वै ॥ १ ॥

एवं बहुविधं वाच्यो रामो दाशरथि स् त्वया ।
यथा मामाप्नुयाच् छीघ्रं हत्वा रावण माहवे ॥ २ ॥

यदि वा मन्यसे वीर वसैकाह मरिन्दम ।
कस्मिंश्चित् संवृते देशे विश्रान्तः श्वो गमिष्यसि ॥ ३ ॥

मम चाप्यल्प भाग्यायाः सान्निध्यात् तव वानर ।
अस्य शोक विपाकस्य मुहूर्तं स्याद् विमोक्षणम् ॥ ४ ॥

गते हि त्वयि विक्रान्ते पुन रागमनाय वै ।
प्राणानामपि सन्देहो मम स्यान् नात्र संशयः ॥ ५ ॥

तवा दर्शनजः शोको भूयो मां परितापयेत् ।
दुःखाद् दुःखा पराभूतां दुर्गतां दुःख भागिनीम् ॥ ६ ॥

अयं च वीर सन्देहस् तिष्ठतीव ममाग्रतः ।
सुमहांस् त्वत् सहायेषु हर्यृक्षेषु हरीश्वर ॥ ७ ॥

कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिम् ।
तानि हर्यृक्ष सैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥

त्रयाणामेव भूतानां सागरस्यास्य लङ्घने ।
शक्तिः स्याद् वैनतेयस्य तव वा मारुतस्य वा ॥ ९ ॥

तदस्मिन् कार्य निर्योगे वीरैवं दुरतिक्रमे ।
किं पश्यसि समाधानं ब्रूहि कार्य विदां वरः ॥ १० ॥

काममस्य त्वमेवैकः कार्यस्य परिसाधने ।
पर्याप्तः परवीरघ्न यशस्यस्ते बलोदयः ॥ ११ ॥

बलैः समग्रैर् यदि मां हत्वा रावण माहवे ।
विजयी स्वां पुरीं रामो नयेत्तत् स्याद् यशस्करम् ॥ १२ ॥

यथाहं तस्य वीरस्य वना दुपधिना हृता ।
रक्षसा तद् भयादेव तथा नार्हति राघवः ॥ १३ ॥

बलैस्तु सङ्कुलां कृत्वा लङ्कां पर बलार्दनः ।
मां नयेद्यदि काकुत्स्थस् तत्तस्य सदृशं भवेत् ॥ १४ ॥

तद्यथा तस्य विक्रान्तमनुरूपं महात्मनः ।
भवत्याहव शूरस्य तथा त्वमुप पादय ॥ १५ ॥

तदर्थोप हितं वाक्यं प्रश्रितं हेतु संहितम् ।
निशम्याहं ततः शेषं वाक्य मुत्तर मब्रवम् ॥ १६ ॥

देवि हर्यृक्ष सैन्याना मीश्वरः प्लवतां वरः ।
सुग्रीवः सत्त्व सम्पन्नस् तवार्थे कृत निश्चयः ॥ १७ ॥

तस्य विक्रम सम्पन्नाः सत्त्ववन्तो महाबलाः ।
मनःसङ्कल्प सम्पाता निदेशे हरयः स्थिताः ॥ १८ ॥

येषां नोपरि नाधस्तान् न तिर्यक् सज्जते गतिः ।
न च कर्मसु सीदन्ति महत् स्वमित तेजसः ॥ १९ ॥

असकृत्तैर् महाभागैर् वानरैर् बलदर्पितैः ।
प्रदक्षिणी कृता भूमिर् वायु मार्गानु सारिभिः ॥ २० ॥

मद्विशिष्टाश्च तुल्याश्च सन्ति तत्र वनौकसः ।
मत्तः प्रत्यवरः कश्चिन् नास्ति सुग्रीव सन्निधौ ॥ २१ ॥

अहं तावदिह प्राप्तः किं पुनस्ते महाबलाः ।
न हि प्रकृष्टाः प्रेष्यन्ते प्रेष्यन्ते हीतरे जनाः ॥ २२ ॥

तदलं परितापेन देवि मन्युर् व्यपैतु ते ।
एकोत्पातेन वै लङ्का मेष्यन्ति हरि यूथपाः ॥ २३ ॥

मम पृष्ठ गतौ तौ च चन्द्र सूर्या विवोदितौ ।
त्वत् सकाशं महाभागे नृसिंहा वा गमिष्यतः ॥ २४ ॥

अरिघ्नं सिंह सङ्काशं क्षिप्रं द्रक्ष्यसि राघवम् ।
लक्ष्मणं च धनुष्पाणिं लङ्का द्वार मुपस्थितम् ॥ २५ ॥

नख दंष्ट्रायुधान् वीरान् सिंह शार्दूल विक्रमान् ।
वानरान् वारणेन्द्राभान् क्षिप्रं द्रक्ष्यसि सङ्गतान् ॥ २६ ॥

शैलाम्बुद निकाशानां लङ्कामलय सानुषु ।
नर्दतां कपि मुख्याना मचिराच् छ्रोष्यसि स्वनम् ॥ २७ ॥

निवृत्त वनवासं च त्वया सार्ध मरिन्दमम् ।
अभिषिक्त मयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् ॥ २८ ॥

ततो मया वाग्भिरदीन भाषिणा
शिवाभि रिष्टाभि रभि प्रसादिता ।

जगाम शान्तिं मम मैथिलात्मजा
तवापि शोकेन तदाभि पीडिता ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥